# ईन्द्रादिकृत देवि स्तुति

या देवी सर्वभूतेषु विष्णुमायेति शब्दिता - नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१ ॥

या देवी सर्वभूतेषु चेतनेत्यभिधीयते - नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ ।२ ॥

या देवी सर्वभूतेषु बुद्धिरूपेण संस्थिता - नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥३ ॥

या देवी सर्वभूतेषु निद्रारूपेण संस्थिता - ॥४ ॥

या देवी सर्वभूतेषु क्षुधारूपेण संस्थिता - ॥५ ॥

या देवी सर्वभूतेषु छायारूपेण संस्थिता - ॥६ ॥

या देवी सर्वभूतेषु शक्तिरूपेण संस्थिता - ॥७ ॥

या देवी सर्वभूतेषु तृष्णारूपेण संस्थिता - ॥८ ॥

या देवी सर्वभूतेषु क्षान्तिरूपेण संस्थिता - ॥९ ॥

या देवी सर्वभूतेषु जातिरूपेण संस्थिता - ॥१० ॥

या देवी सर्वभूतेषु लज्जारूपेण संस्थिता - ॥११ ॥

या देवी सर्वभूतेषु शान्तिरूपेण संस्थिता - ॥१२ ॥

या देवी सर्वभूतेषु श्रद्धारूपेण संस्थिता - ॥१३ ॥

या देवी सर्वभूतेषु कान्तिरूपेण संस्थिता - ॥१४ ॥

या देवी सर्वभूतेषु लक्ष्मीरूपेण संस्थिता - ॥१५ ॥

या देवी सर्वभूतेषु वृत्तिरूपेण संस्थिता - ॥१६ ॥

या देवी सर्वभूतेषु स्मृतिरूपेण संस्थिता - ॥१७ ॥

या देवी सर्वभूतेषु  दयारूपेण संस्थिता -   ॥१८॥

या देवी सर्वभूतेषु  तुष्टिरूपेण संस्थिता -   ॥१९॥

या देवी सर्वभूतेषु  मातृरूपेण संस्थिता -   ॥२०॥

या देवी सर्वभूतेषु  भ्रान्तिरूपेण संस्थिता -  नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२१॥